ऋषभः कूटकः कोलः सह्यः देवगिरिः ऋष्यमूकः श्रीशैलः महेन्द्रः वारिधारः विन्ध्यः शुक्तिमान् ऋक्षगिरिः पारियात्रः द्रोणः चित्रकूटः गोवर्द्धनः रैवतकः ककुभः नीलः कोकः गोमुखः इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलाः । * । तेषां नितम्बप्रभवा नद्यो ह्यसंख्याताः । यथा, चन्द्रवंशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णवेणा भीमरथी गोदावरी निर्व्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती महानदी वेदस्मृतिः ऋषिकुल्या त्रिसामा गण्डकी वामती कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूः ओघवती सुषोमा शतद्रुः चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वा इति महानद्यः । अस्य शोणश्च नदी । * । अस्मिन् वर्षे लब्धजन्मभिः पुरुषैः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिव्यमानुषनारकगतयो भवन्ति । * । जम्बुद्वीपस्य अष्टौ उपद्वीपाः सन्ति सगरात्मजैरश्वान्वेषणे इमां महीं परितो निखनद्भिरुपकल्पिताः । तद्यथा, स्वर्णप्रस्थः चन्द्रशुक्लः आवर्त्तनः रमणकः मन्दहरिणः पाञ्चजन्यः सिंहलः लङ्का इति । इति श्रीभागवते । ५ । १६ अध्याये । तथा च मार्कण्डेये ५४ अध्याये मात्स्ये ११२ अध्याये च द्रष्टव्यम् ॥ * ॥ ज्योतिःशास्त्रमते लवणसमुद्रस्योत्तरे जम्बुद्वीपः । स तु भूम्यर्द्धभागः । तस्य दक्षिणे द्वितीयार्द्धभागे द्वीपषट्कस्य सप्तसमुद्रस्य च निवेशः । इति सिद्धान्तशिरोमणिः ॥

जम्बुलः, पुं, (जम्बुं जम्बुफलं लातीति । ला + कः ।) जम्बूवृक्षः । केतकवृक्षः । इति विश्वः ॥ (यथा, सुश्रुते । १ । १६ ।
"अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथा ॥")

जम्बुवनजं, क्ली, (जम्बुवनमिव जायते इति । जन् + डः ।) श्वेतजवापुष्पम् । यथा,—
"पारिभद्रं पाटला च वकुलं गिरिशालिनी ।
तिलकं जम्बुवनजं पीतकं तगरन्तथा ॥
एतानि हि प्रशस्तानि कुसुमान्यच्युतार्च्चने ॥"
इति वामनपुराणम् ॥

जम्बूः, स्त्री, (जम्यते भक्ष्यते इति । जमु अदने + "अन्दूदृन्फूजम्बूति ।" उणा १ । ६५ । इति कूः ।) नागदमनी । इति राजनिर्घण्टः ॥ वृक्षविशेषः । जाम इति भाषा । तत्पर्य्यायः । सुरभिपत्रा २ नीलफला ३ श्यामला ४ महास्कन्धा ५ राजार्हा ६ राजफला ७ शुकप्रिया ८ मेघमोदिनी ९ । तत्फलगुणाः । कषायत्वम् । मधुरत्वम् । श्रमपित्तदाहकण्ठार्त्तिशोषशमिदोषश्वासातिसारकफकासविनाशित्वम् । विष्टम्भित्वम् । रोचनत्वम् । पाचनत्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । ग्राहित्वम् । शीतलत्वम् । अग्निसंदूषणत्वम् । रूक्षत्वम् । वातकारित्वम् । इति राजवल्लभः ॥ सा बृहत्क्षुद्रभेदेन द्विविधा । तत्र बृहत्याः पर्य्यायः । महाजम्बूः १ महापत्रा २ राजजम्बूः ३ बृहत्फला ४ । इति रत्नमाला ॥ फलेन्द्रः ५ नन्दः ६ महाफला ७ सुरभिपत्रा ८ । एतत्फलगुणाः । विष्टम्भित्वम् । गुरुत्वम् । रोचनत्वम् । इति भावप्रकाशः ॥ क्षुद्रायाः पर्य्यायः । सूक्ष्मकृष्णफला १ दीर्घपत्रा २ मध्यमा ३ । वनजम्बूपर्य्यायः । भूमिजम्बूः १ काकजम्बूः २ नादेयी ३ शीतपल्लवा ४ । इति रत्नमाला ॥ सूक्ष्मपत्रा ५ जलजम्बुका ६ । तत्फलगुणाः । ग्राहित्वम् । रूक्षत्वम् । कफपित्तास्रदाहनाशित्वञ्च । इति भावप्रकाशः ॥ तत्फलस्य पर्य्यायः । जम्बु २ जाम्बवम् ३ । इत्यमरः । २ । ४ । १६ ॥ (स्वनामख्याता नदी । यथा, मात्स्ये । १२० । ६७ ।
"मेरोः पार्श्वात् प्रभवति ह्रदश्चन्द्रप्रभो महान् । जम्बूश्चैव नदी पुण्या यस्यां जाम्बूनदं स्मृतम् ॥")

जम्बूकः, पुं, स्त्री, (जम्बुकः पृषोदरादित्वात् दीर्घः ।) शृगालः । इति शब्दरत्नावली ॥ जम्बुकशब्दार्थोऽप्यत्र ॥

जम्बूका, स्त्री, (जम्बूरिव कायतीति । कै + कः । अजादित्वात् टाप् ।) काकलीद्राक्षा । इति राजनिर्घण्टः ॥

जम्बूलः, पुं, (जम्बूं जम्बूफलं लातीति । ला + कः ।) जम्बूवृक्षः । केतकवृक्षः । इति मेदिनी । ले, ६४ ॥ (यथा, हरिवंशे । ९६ । १६ ।
"जम्बूजम्बूलवृक्षाढ्यं कन्दकन्दलभूषितम् ॥"
वरपक्षीयस्त्रीणां परिहासवचनम् । इति नीलकण्ठः ॥)

जम्बूलमालिका, स्त्री, (जम्बूलस्य वरपक्षीयरमणीपरिहासवचनस्य मालिका परम्परा ।) कन्यावरयोर्मुखचन्द्रिका । इत्युद्वाहतत्त्वम् ॥ (यथा, हरिवंशे । १८३ । २२ ।
"ब्राह्मीभिर्व्वर्द्धयित्वा च देवर्षिः कृष्णमब्रवीत् । अनिरुद्धस्य वीर्य्याढ्यो विवाहः क्रियतां विभो ! । जम्बूलमालिकां द्रष्टुं श्रद्धा हि मम जायते ॥")
"जम्बूलं वरपक्षीयस्त्रीणां परिहासवचनं तेषां मालिका श्रेणी ।" इति तट्टीकायां नीलकण्ठः ॥

जम्भः, पुं, (जम्भते जृम्भते इति । जभि गात्रविनामे + पचाद्यच् । "रधिजभोरचि ।" ७ । १ । ६१ । इति नुम् ।) दैत्यभेदः । (इन्द्र एनं निहतवान् ।) अपरो दैत्यविशेषः । विष्णुरेनं जघान । यथा, महाभारते । ३ । १०२ । २४—२५ ।
"असुरश्च महेष्वासो जम्भ इत्यभिविश्रुतः । यज्ञक्षोभकरः क्रूरस्त्वयैव विनिपातितः ॥ एवमादीनि कर्म्माणि येषां संख्या न विद्यते । अस्माकं भयभीतानां त्वं गतिर्मधुसूदन ! ॥"
प्रह्लादपुत्त्राणामेकतमः । यथा, हरिवंशे । २१८ । ३५ ।
"प्रह्लादस्य त्रयः पुत्त्रा विक्रान्ताश्च महाबलाः । विरोचनश्च जम्भश्च कुजम्भश्चेति विश्रुताः ॥"
राक्षसविशेषः । स तु रावणस्यानुचरः । यथा, महाभारते । ३ । २८४ । रामरावणयुद्धे । २ ।
"पर्व्वणः पूतनो जम्भः खरः क्रोधवशो हरिः ।"
जम्भ्यते भक्ष्यतेऽनेनेति । जम्भ + करणे घञ् ।) दन्तः । यथा, ऋग्वेदे । ८ । ६१ । २ ।
"इमं जम्भसुतं पिब ।" "जम्भसुतं दन्तैरभिषुतम् ।" इति तद्भाष्यम् ॥ * ॥ जम्भ्यते भक्ष्यतेऽसौ इति कर्म्मणि घञ् ।) जम्बीरः । (यथा,—
"स्याज्जम्बीरो दन्तशठो जम्भजम्भीरजम्भलाः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ * ॥ जम्भ + भावे घञ् ।) भक्षणम् । इति मेदिनी । भे, ४ ॥ (यथा, महाभारते । ५ । ६४ । २० ।
"इति ते कथयन्ति स्म ब्राह्मणा जम्भसाधकाः ॥")
अंशः । इषुः । तूणः । इति हेमचन्द्रः ॥

जम्भकः, पुं, (जम्भ एव । स्वार्थे कन् ।) जम्बीरः । इति शब्दचन्द्रिका । (स्वनामख्यातो नृपविशेषः । यथा, महाभारते । २ । ३१ । ७ ।
"ततश्चर्म्मण्वतीकूले जम्भकस्यात्मजं नृपम् । ददर्श वासुदेवेन शेषितं पूर्व्ववैरिणा ॥" * ॥) जम्भतीति जभङ्जभने + ण्वुल् । कामुके, त्रि ॥)

जम्भका, स्त्री, (जम्भा एव । स्वार्थे कन् ।) जृम्भा । इति राजनिर्घण्टः ॥

जम्भगः, पुं, (जम्भाय भक्षणाय गच्छति भ्रमतीति । गम + डः । अतिशयभक्षणशीलत्वात् तथात्वम् ।) राक्षसविशेषः । यथा,—
"देवा यक्षास्तथा नागा गन्धर्व्वाप्सरसोऽसुराः । क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भगाः खगाः ॥ विद्याधरा जलाधारास्तथैवाकाशगामिनः । निराहाराश्च ये जीवाः पापेऽधर्म्मे रताश्च ये ॥ तेषामाप्यायनायैतद्दीयते सलिलं मया ॥"
इत्याह्निकाचारतत्त्वधृतपद्मपुराणवचनम् ॥

जम्भद्विट्, [ष्] पुं, (जम्भं तदाख्यया प्रसिद्धमसुरं द्वेष्टीति । द्विष + क्विप् । जम्भस्य द्विट् इति वा ।) इन्द्रः । इति हेमचन्द्रः ॥ (विष्णुः । इति महाभारतम् ॥)

जम्भभेदी, [न्] पुं, (जम्भं भेत्तुं शीलमस्य । भिद् + "सुप्यजातौ णिनिस्ताच्छील्ये ।" ३ । २ । ७८ । इति णिनिः ।) इन्द्रः । इत्यमरः । १ । १ । ४६ ॥

जम्भरः, पुं, (जम्भं भक्षणरूपं राति ददातीति । जम्भ + रा + कः ।) जम्बीरः । इति शब्दचन्द्रिका ॥

जम्भलः, पुं, (जम्भर । रस्य लत्वम् ।) जम्बीरः । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"स्याज्जम्बीरो दन्तशठो जम्भजम्भीरजम्भलाः ॥")
बुद्धदेवविशेषः । इति मेदिनी । ले, ६३ ॥

जम्भला, स्त्री, (जम्भं भक्षणं लाति आदत्ते इति । ला + कः ।) राक्षसीविशेषः । यथा,—
"समुद्रस्योत्तरे तीरे जम्भला नाम राक्षसी । तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत् ॥"
इति ज्योतिस्तत्त्वे राजमार्त्तण्डः ॥

जम्भा, स्त्री, (जम्भ्यते इति । जभि जृम्भायाम् + भावे अः ततः स्त्रियां टाप् ।) जृम्भा । इति राजनिर्घण्टः ॥